HMMCW LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2021-22

## SANADSE01T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्।

क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) रुद्रस्य तनुः कीदृशी आसीत् ?

(ख) रुद्रशब्दस्य उत्पत्तिः कस्माद्धातोः भवति ? कश्च रुद्रशब्दस्यार्थः ?

(ग) शुक्लयजुर्वेदस्य सुप्रसिद्धौ द्वौ भाष्यकारौ कौ ?

(घ) शुक्लयजुर्वेदस्य कस्मिन् अध्याये रुद्रस्तुतिः प्राप्यते ? अत्र कति मन्त्राः सन्ति ?

(ङ) 'गिरित्र' इति पदस्य कोऽर्थः ?

(च) रुद्रसूक्ते ऋषिः कं कं च प्रणमति ?

(छ) 'अधिवक्ता' इति कस्य विशेषणम् ? कथं च तत्प्रयुज्यते ?

ख-विभागः

2. अधोलिखितेषु प्रश्नेषु यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) कस्मिन् ब्राह्मणे मनुमत्स्यकथा लभ्यते ? अत्र प्लावनवर्णनं यथा प्राप्यते तथा समासेन लिखत। 1+1+8

(ख) 'बिभृहि मा पारयिष्यामि त्वेति'– केन उक्तम् ? केन प्रकारेण हि तस्य पोषणं भवति ? येनेदम् उक्तम् सः कं कस्मात् वा पारयिष्यति ? अन्तिमे वक्ता किं करोति ? 1+2+2+5

ग-विभागः

3. अधः प्रदत्तेषु यथेच्छं विषयमेकमाश्रित्य टीकां लिखत। 5×1 = 5

(क) हव्यकव्यम्

(ख) श्रीर्विषयसुखरसास्वादनाय

(ग) मुरजित्पादनखदीधितिदीपिका।

अथवा

अधः प्रदत्तेषु श्लोकेषु <u>यथेच्छमेकः</u> श्लोको व्याख्येयः। 5×1 = 5

(क) शास्त्यरीन् धर्ममाशास्ते कीर्तिमाशंसते पराम्।

यः शंसते सतां वृत्तिं विशसत्युत्पथस्थितान्॥

(ख) वेत्ति सर्वाणि शास्त्राणि गर्वो यस्य न विद्यते।

विन्ते धर्मं सदा सद्भिस्तेषां पूजाञ्च विन्दति॥

(ग) लोकेषु शास्त्रेषु च ये प्रसिद्धाः
काव्येषु ये सत्कविभिः प्रयुक्ताः।
उच्चित्य तां श्चित्तविनोदनाय
शब्दानहं धातुभिरुद्धरामि॥

घ-विभागः

4. अधोदत्तेषु विषयेषु <u>यथेच्छमेकमाश्रित्य</u> टिप्पनी लेख्या। 5×1 = 5

(क) स्वरः, (ख) महासंहिता, (ग) पाङ्क्तम्।

अथवा

अधोलिखितेषु उपनिषद्वाक्येषु <u>यथेच्छमेकं</u> व्याख्येयम्। 5×1 = 5

(क) माहाचमस्यः प्रवेदयते।

(ख) ओमिति ब्रह्म। ओमितीदं सर्वम्।

(ग) सह नौ यशः। सह नौ ब्रह्मवर्चसम्।

ङ-विभागः

5. <u>यथेच्छमेकस्य</u> प्रश्नस्योत्तरं विधेयम्। 10×1 = 10

(क) किं नाम ब्राह्मणम् ? ऋग्वेदस्य कतिविधः ब्राह्मणग्रन्थः ? नाभानेदिष्ठाख्यानं कस्मिन् ब्राह्मणग्रन्थे लभ्यते ? अस्मिन् आख्याने लब्धां कथां समासेन प्रतिपादयत। 2+1+1+6

(ख) 'किं कामी वदसि' ?– इत्यत्र कः प्रश्नकर्ता ? स कं पृच्छति ? किमासीत् तस्य उत्तरम् ? अन्तिमे तस्य कीदृशी प्राप्तिः भवति ? 1+1+2+6

च-विभागः

6. अधः प्रदत्तेषु पदेषु यथेच्छं <u>द्वयोः</u> पदयोः रूपसाधनं कुंरुत। 5×2 = 10

अजा, सूर्या, कुमारी, साधिका, नर्तकी, कर्त्री।

अथवा

यथेच्छं <u>सूत्रद्वयं</u> व्याख्येयम्। 5×2 = 10

(क) ऋन्नेभ्यो ङीप्

(ख) पादोऽन्यतरस्याम्

(ग) वयसि प्रथमे

(घ) अजाद्यतष्टाप्

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——